दिनाङ्क :- 15.06.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा-नरेन्द्र-मोदिना प्रोक्तम् त्रयाणां राष्ट्राणां यात्रा अस्ति आतङ्कवादविरोधसमर्थनार्थ: भारतस्य कृते अवसरः। यात्राया: प्रथम चक्रे असौ साइप्रसं संप्राप्तवान् ।

· महाराष्ट्रस्य पुणेमण्डले इन्द्रायणी नद्याः उपरि निर्मित: सेतुः पतितः। त्रिंशत् जनाः निमग्नाः इति आशङ्का।

· उत्तराखण्डस्य केदारनाथे गौरीकुन्डस्य पर्वतीयक्षेत्रे एकम् हेलिकॉप्टर- इति उदग्रयानं दुर्घटनाग्रस्तं जातम् । यस्मिन् सप्तजना: मृता:।

· ईरान् इजरायल् देशौ च स्वस्य प्रत्यक्षसङ्घर्षस्य घातकतमं चरणं प्रविष्टवन्तौ। तेहराननगरे इजरायल् देशेन प्रमुख-तैल-ऊर्जा स्थलेषु आक्रमणस्य मध्ये इजरायल्-नगरेषु ईरानी-प्रहारै: च न्यूनातिन्यूनं दश जना: मृता:।

· टेबलटेनिस्-क्रीडायां भारतस्य मानवठक्करः मनुषशाहः च डब्ल्यूटीटी-कन्टेण्डर -स्कोप्जे-पञ्चविन्शत्युत्तर द्विसहस्रस्य् पुरुष-युगलस्य अन्तिम-चक्रे प्रवेशं कृतवन्तौ ।

<u>अथवार्ता: विस्तारेण</u>

<u>प्रधानमन्त्री</u>

प्रधानमन्त्रिणा-नरेन्द्र-मोदिना प्रोक्तम् त्रयाणां राष्ट्राणां यात्रा अस्ति आतङ्कवादविरोधसमर्थनार्थ: अवसरः। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् साइप्रस-कनाडा-क्रोएशिया-देशानां त्रयाणां राष्ट्राणां यात्रया अधिसीमम् आतङ्कवादस्य विरोधे युद्धे

भारताय दृढ-समर्थनस्य कृते आभारं प्रकटयितुम् अवसरः अस्ति। तेन उक्तं यत् आतङ्कवादस्य सर्वेषु रूपेषु, आतङ्कवादस्य निवारणाय वैश्विक-प्रयासान् प्रेरयितुं च अवसरः अस्ति। अद्य प्रातः सायप्रस्-देशं प्रति प्रस्थानात् पूर्वं स्वस्य वक्तव्ये सः अवदत् यत् एषा यात्रा ऐतिहासिकसम्बन्धं सुदृढं कर्तुं व्यापार-निवेश-सुरक्षा-प्रौद्योगिक्याः क्षेत्रेषु अस्माकं सम्बन्धानां विस्तारं कर्तुं, जनम्-जनम्- प्रति आदानम् -प्रदानं च प्रवर्तयितुं अवसरं प्रददाति। सः अवदत् यत् साइप्रस् भूमध्यसागरीयक्षेत्रस्य यूरोपीयसङ्घस्य च मित्रम्, महत्त्वपूर्णः सहयोगी च अस्ति।

प्रधानमन्त्रिणा उक्तं यत् कनाडादेशे जी-सप्त शिखरसम्मेलने ग्लोबल साउथ् इत्यस्य वैश्विकविषयेषु प्राथमिकतासु च विचारविनिमयस्य स्थानं प्रदास्यते। सः अवदत् यत् क्रोएशियादेशस्य यात्रया परस्परक्षेत्रेषु द्विपक्षीयसहकार्यस्य नूतनाः मार्गाः उद्घाटिताः भविष्यन्ति।

-

**<u>पुणे सेतु:</u>**

महाराष्ट्रस्य पुणेमण्डले मावल - तालुकायाः समीपे इन्द्रायणी नद्याः उपरि निर्मित: एकः सेतुः अद्य पतितः। न्यूनातिन्यूनाः पञ्चविंशति त: त्रिंशत् जनाः निमग्नाः इति आशङ्का क्रियते।

**<u>उत्तराखण्डस्य हेलिकॉप्टर- दुर्घटनाग्रस्तं</u>**

अद्य प्रातः उत्तराखण्डस्य केदारनाथक्षेत्रे गौरीकुन्डस्य पर्वतीयक्षेत्रे एकम् हेलिकॉप्टर- इति उदग्रयानं दुर्घटनाग्रस्तं जातम्। यस्मिन् सप्त जनाः मृताः। मृतेषु षट् तीर्थयात्रिणः एक: विमानचालकः च एते आसन्। हेलिकॉप्टर उदग्रयानं केदारनाथतः गुप्तकाशीनगरं गच्छति स्म । सहाय्यो - उद्धार-कार्यक्रमाः आरब्धाः। राज्य आपद्-प्रतिक्रियाबलेन उक्तं यत् दुर्घटनाग्रस्तं हेलिकॉप्टर उदग्रयानं सम्पूर्णतया दग्धं। सर्वे शवाः निष्कासिता:। जनपद पर्यटन अधिकारी राहुल चौबे इत्यनेन उक्तं यत्, ऋतु दुष्प्रभाव कारणात् हेलिकॉप्टर उदग्रयानस्य सहसा वृक्षेण सह संघर्षः जातः येन एषा दुर्घटना अभवत्।

मुख्यमन्त्री पुष्करसिंहधामी इत्यनेन हेलिकॉप्टर उदग्रयानसेवा द्वाभ्यां दिवसाभ्यां स्थगनं कर्तुम् आदेशः प्रदत्तः। अस्याः दुर्घटनायाः विषये अतीव दुःखं प्रकटयन् सः अवदत् यत् यात्रिणां सुरक्षा सर्वोच्चप्राथमिकता अस्ति।

## अमित शाह:

केन्द्रीय गृह मन्त्रिणा अमित शाहेन  अद्य लखनऊ नगर्यां एकस्मिन् कार्यक्रमे उत्तर -प्रदेश-आरक्षिण: चतुश्चत्वारिंशदधिक दिवशतोत्तर षष्टि-सहस्र कांस्टेबल इत्येभ्य: नियुक्तिपत्राणि समर्पितानि। राज्ये विधि-प्रवर्तनाय एतत् महत्वपूर्णम् कार्यम् अस्ति। अमितशाहेन उक्तं यत् प्रधानमन्त्रिण: नरेन्द्र मोदिन: नेतृत्वे देशे आरक्षिबलानाम् आधुनिकीकरणं जातम्।

अवसरेऽस्मिन् मुख्यन्त्री योगी आदित्यनाथोऽपि आसीत्।

## ईरान्-इजरायल युद्धम्

ईरान् इजरायल् देशौ च स्वस्य प्रत्यक्षसङ्घर्षस्य घातकतमं  चरणं  प्रविष्टवन्तौ।  तेहराननगरे इजरायल् देशेन प्रमुख-तैल-ऊर्जा स्थलेषु आक्रमणस्य मध्ये इजरायल्-नगरेषु ईरानी-प्रहारै: न्यूनातिन्यूनं दश जना: मृता:। सैन्य-विनिमयस्य तृतीयदिनं यावत् एतत् वर्धनं भवति, यत्र मानवीया क्षति: वर्धमानाया: क्षेत्रीय अस्थिरताया: च वर्धमानयो: देशयो: अग्रे क्रियान्वयनाय कर्तुं प्रतिज्ञा कृताऽस्ति।

## विमान-दुर्घटना-डीएनए मेलानम्

अहमदाबाद-विमान-दुर्घटनायां एकत्रिंशत् पीड़ितानां डी.एन.ए. प्रतिरूपाणां मेलनम् जातम्। इदानीं यावत् चतुर्दश शवा: मृतकानां परिजनेभ्य: समर्पिता:। अहमदाबादे-सिविल-अस्पताल चिकित्सालयस्य अतिरिक्त अधीक्षकेण डॉक्टर रजनीश पटेलेन प्रोक्तम् यत् येषां जनानां डी.एन.ए. प्रतिरूपाणां मेलनं जातम्, तेषां शवा: तेषाम् परिजनेभ्य समर्प्यन्ते।

पूर्वमुख्यमन्त्रिण: स्वर्गीय विजय रूपाणी इत्यस्य डी.एन.ए. मेलनं जातम् । राज्य-गृह-मन्त्रिणा हर्ष सिंहवी-इत्यनेन घोषणा कृता।

**बाइट-हर्ष सांघ्वी रूपाणी- 24 से.**

<u>पवन ऊर्जा:</u>

केन्द्रीय-नवीन-नवीनीकरण ऊर्जा मन्त्री प्रह्लाद जोशी इत्यनेन उक्तं यत् भारतस्य पवन-ऊर्जा क्षमतायां गवतर्षे षट्चत्वारिंशत् दशमलव चतुर्द्वि गीगावाट्-रुप्यकाणां तुलनायां दश दशमलव

पञ्च प्रतिशताधिका वृद्धि: भूत्वा एकपञ्चा     दशमलव पञ्च गीगावाट् अभवत्। सोशल मीडिया पोस्ट मध्ये नवीनताया: हरितप्रौद्योगिक्या: स्थायि प्रगते: च चालिताया: आत्मनिर्भरताया: दिशि गच्छति। अद्य वैश्विकवायुदिवसस्य अवसरे जोशी महोदय: अवदत् यत् भारतस्य नवीनीकरणी ऊर्जाक्षेत्रे अपूर्ववृद्धि: अभवत्। सौर ऊर्जात: वायुशक्तिपर्यन्तं राष्ट्रं उज्ज्वलतरस्य स्थायित्वस्य च मार्गं प्रशस्तं करोति ।

<u>रॉकेटप्रक्षेपणस्य- इसरो</u>

भारतीय अन्तरिक्ष अनुसन्धानसङ्गठन- इसरो इत्यनेन उत्तरप्रदेशस्य कुशीनगरे रॉकेटप्रक्षेपणस्य सफलम् परीक्षणं जातम्। अस्माकं संवाददाता असूचयत् यत् राज्यस्य कृते एषः ऐतिहासिकः क्षणः अस्ति यतोहि राज्ये प्रथमम् वारं रॉकेटमाध्यमेन लघु उपग्रह-पेलोड्  इत्यस्य प्रक्षेपणम् क्रियते।

<u>संजयजाजूः</u>

सूचनाप्रसारणसचिवः संजयजाजूः  जम्मू-कश्मीरस्य सांस्कृतिक-लोक-आचारं प्रकाशयितुं स्वदेशीय-क्षेत्रीय-कार्यक्रम-निर्माणे बलं दत्तवान्। श्रीनगरे दूरदर्शनस्य आकाशवाण्याश्च च कार्यक्रमाणां वार्ताप्रसारणव्यवस्थायाः समीक्षां कृत्वा आकाशवाण्या सह वार्तायां श्री जाजुः अवदत् यत् कश्मीरक्षेत्रे सर्वाणि मीडिया- जनसंपर्क एकांशैः स्वकार्यक्रमाणां समाचारसामग्रीणां च स्थानीयभाषाणां च सज्जा करणीया।  येन क्षेत्रीयसंपर्कं वर्धेत  प्रेक्षकैः च सह सम्पर्कं कर्तुं च सहयोगः भवेत्।

-

## यूएस-अमरीका

अमेरिकीय- सैन्येन शोभायात्राद्वारा सार्धद्विशतं वर्षाणि आचर्यन्ते। ट्रम्पः सबल-अमेरिकायाः प्रतिज्ञां कृतवान् । अमेरिकीय- सैन्येन शनिवासरे वाशिङ्गटन-नगरे उत्सवेन, शोभायात्रया च सह स्वस्य सार्ध द्विशतं वर्षाणि आचरितानि ।

## जितेन्द्र-विज्ञान

विज्ञान एवं प्रौद्योगिकी मन्त्री डॉक्टर जितेन्द्र सिंह: उक्तवान् यत् आगामिषु वर्षेषु अन्तरिक्ष अर्थ व्यवस्था भारतस्य विकासकथाया: अतीव महत्वपूर्णा घटिका भवितुम् अर्हति। अद्य नवदिल्लीनगरे पत्रकार सम्मेलनं सम्बोधयन् डॉ. सिंह: अवदत् यत् विगतदशवर्षेषु मोदी सर्वकारेण केचन अप्रत्याशित निर्णया: कृता: यथा निजक्षेत्राय स्थानस्य उद्घाटनं, अस्मिन् वर्षे परमाणु क्षेत्रस्य विषये घोषणा।

## टेबलटेनिस्

टेबलटेनिस्-क्रीडायां भारतस्य मानवठक्करः मानुषशाहः च अद्य नोर्थ -मैसेडोनिया-नगरे डब्ल्यूटीटी-कन्टेण्डर -स्कोप्जे-पञ्चविन्शत्युत्तर द्विसहस्रस्य् पुरुष-युगलस्य अन्तिम-चक्रे प्रवेशं कृतवन्तौ ।